# Gangashtakam

# ગઙ્ગાષ્ટકમ્

## Document Information

Text title : Gangashtakam by Hanuman

File name : gangAShTakamhanumAn.itx

Category : devii, nadI, aShTaka, devI

Location : doc_devii

Transliterated by : Shree Devi Kumar shreeshrii at gmail.com

Proofread by : Shree Devi Kumar shreeshrii at gmail.com

Latest update : November 3, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

April 28, 2023

*sanskritdocuments.org*

# Gangashtakam

## ગઙ્ગાષ્ટકમ્

॥ શ્રીગણેશાય નમઃ ॥

ગઙ્ગાનઙ્ગારિસઙ્ગા સરિદુપરિ પરિક્રીડમાના વિમાના-
દવ્યાદવ્યાજભાજઃ કલિતકલિતમોહારિ મોહારિવારિ ॥

યત્કૂલે કોલકોલાહલિનિ હલિનિભે કેતકસ્વચ્છકચ્છ-
ચ્છાયાનાયાસિકાયાનુપતનપવનઃ સેવતે દેવતેન્દ્રાન્ ॥ ૧॥

માતર્માતઙ્ગસઙ્ગાસ્તિમિતતિમિતનૂર્ધારિ વિસ્તારિ વારિ
તારાકારાનુકારા તરલતરલકૈશ્ચામરૈશ્ચામરીણામ્ ।
સાન્તઃ સ્વાન્તઃ કદાન્તઃશમિતકલિતમસ્તોમદાહં મુદાહં
દક્ષાભિક્ષામિતાર્તિસ્તવ ભવદવસંહારિશઙ્કારિહારિ ॥ ૨॥

યન્નાપન્નાસસૂરે સુરધુનિ વિધુનિસ્યન્દનિસ્પન્દધુર્યે
દેહં તેઽહંસગેહં વહતિ વહતિ સન્માનસં માનસઙ્ગાત્ ।
કિં તેન સ્તેનભાવં ભવભવિકમિદં બિભ્રતાદભ્રતાપં
વ્યાયત્તેનાસ્રવાતપ્રસરસરણિનાં મદ્વિધાનાં બુધાનામ્ ॥ ૩॥

યૈનોન્મીલન્મરાલીવિમલકુલમિલત્સારસી સારશીલં
દુઃશીલૈર્દેવિ ? દેવૈરકલિતમકલિ ત્વદ્વપુવાર્વિપુષ્ટૈઃ ।
તેષાં દ્વેષાધિદોષાકલિતકલિતરા શૃઙ્ખલા શૃઙ્ખલાનામ્ ।
છાયામાયાનિકાયાદનનુગુણગણાઃ સંસ્રવન્તિ શ્રવન્તિ ॥ ૪॥

વાતવ્યાધૂતનૂતાવલિગલિતરજોરાજિવિભ્રાજિતાભ્રા
ભ્રામ્યબૃઙ્ગાલિકેલીકલિતકલકલા નદનં દન્મુતીયમ્ ।
અમ્ભસ્તમ્બેરમાલીમિલદમલરદારબ્ધવિસ્રબ્ધરોધો
રોધઃ કર્માદિકર્મપ્રસરસરભસં પ્રશ્રયેનાશ્રયન્તે ॥ ૫॥

સર્પત્કર્પૂરપૂરોજ્જ્વલજલપટલપ્રાણિભિઃ પ્રાણિતાર્થેઽ
ત્યર્થ વ્યર્થં કૃતાર્થં કૃતમપિ સુકૃતૈર્મન્યતે જન્મ તેષામ્ ।

સંસારાસારકારાસરણિપરિણતૈર્બન્ધભિર્બન્ધમુક્તૈઃ
ધીર્મુક્તૈમુક્તિમૂર્તિર્ભગવતિ ! ભવતી યૈરદૃષ્ટ્યારદૃષ્ટ્યા ॥ ૬॥

લોલત્કલ્લોલકોલાહલવહલદલોત્તાલવાલાવિલાસા ।
બંહદ્વૃન્દારબન્દાકરણિકરકરાસઙ્ગરિઙ્ગદ્વિહઙ્ગા ।
એકાદોષાપ્યશેષા વિકરવિકરિણારમ્ભસંરમ્ભવર્યા
કુર્યાદ્ધુર્યા ધુરીણાં ભવિકમવિકલં સપ્રભાવપ્રભાવઃ ॥ ૭॥

રામારામાભિરામં ચતુરગતુરગં । તુઙ્ગમાતઙ્ગસઙ્ગં
ભ્રાજ્યં પ્રાજ્યં ન રાજ્યં ભગવતિ ભવતિ પ્રેયસે શ્રેયસે વા ।
સેવા તે વા ક્ક દેવા સુરશિરસિ ગિરા નન્દતે વન્દતે ચેત્
સિદ્ધીનાં સિદ્ધિસિન્ધો ન તવનતરવઃ સનિધાનં નિધાનમ્ ॥ ૮॥

ગર્ભાવિ વિ ભૂયઃ પરિમલપરિમાલંવરોલમ્બરોલૈ
ચાલૈઃ પુષ્પજાલૈઃ પટુવિટપિતટી બિભ્રતી શુભ્રતીરા ।
ધ્વસ્તાધિવ્યાધિવાચાવિધુરવિધુસુધામેદુરા મે દુરાપઃ ।
પાયાનઃ પાતુ ગૌરી ગુરુગિરિશિરસિ સ્વઃ શ્રવન્તી શ્રવન્તી ॥ ૯॥

વરં ત્વદીયે પુલિને પુલિન્દા મન્દાકિનીક્ષાલિતપાપકન્દા ।
મન્દારમાલામલકણ્ઠનાલા ન ભૂમિપાલા ન ચ લોકપાલાઃ ॥ ૧૦॥

ઇતિ શ્રી હનુમદ્વિરચિતં ગઙ્ગાષ્ટકં સમ્પૂર્ણમ્ ।

Encoded and proofread by Shree Devi Kumar shreeshrii at gmail.com

*Gangashtakam*
pdf was typeset on April 28, 2023

Please send corrections to *sanskrit@cheerful.com*